Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

**S–71–Sanskritam (T.L.)(Supp.)**

No. of Printed Pages – 11

# माध्यमिक पूरक परीक्षा, 2024

## SECONDARY SUPPLEMENTARY EXAMINATION, 2024

## तृतीय भाषा – संस्कृतम्

**समय** : 3.15 **(सपादहोरात्रयम्)**

**पूर्णाङ्का** : 80

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्यनिर्देशा :**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए

## खण्ड – अ

प्र.1) वस्तुनिष्ठ प्रश्ना :

i) गहनकानने बुद्धिमती कं ददर्श? [1]

अ) सिंहम् ब) व्याघ्रम्

स) नकुलम् द) अजम्

ii) ''जननीतुल्यवत्सला'' पाठः कुतः गृहीतः? [1]

अ) महाभारततः ब) रामायणतः

स) पञ्चतन्त्रतः द) हितोपदेशतः

iii) शतशकटीयानं मुञ्चति – [1]

अ) पवनम् ब) अनलम्

स) घूमम् द) जलम्

iv) मनुष्याणां शरीरस्थः महान् रिपुः विद्यते – [1]

अ) माधुर्यम् ब) आलस्यम्

स) दारिद्र्यम् द) भोज्यम्

v) दैवगतिः कीदृशी? [1]

अ) चित्रा ब) पवित्रा

स) द्विात्रा द) विचित्रा

vi) पिता पुत्राय कदा विद्याधनं यच्छति? [1]

अ) शयने ब) वार्धक्ये

स) बाल्ये द) यौवने

vii) ''अन्तर्जगति'' इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति – [1]

अ) अन्तः + जगति ब) अन्त + र्जगति

स) अन्तस् + जगति द) अर्न्त + जगति

viii) ''कः + चित्'' इत्यस्य पदस्य सन्धिपदयस्ति – [1]

अ) कःचित् ब) कचित्

स) कश्चित् द) कस्चिद्

ix) ष्टुत्वसन्धेः उदाहरणमस्ति – [1]

अ) पयः पूटम् ब) पिष्टाः

स) पुनश्च द) यज्ञः

x) चर्त्वसन्धेः उदाहरणं लिखत । [1]

अ) तन्मात्रम् ब) जगदीशः

स) सज्जनः द) सत्कारः

xi) ''प्रतिगृहम्'' इत्यस्य पदस्य समासविग्रहः अस्ति – [1]

अ) गृहं गृहं प्रति ब) गृहस्य प्रति

स) गृहाय प्रति द) गृहस्य पश्चात्

xii) बहुव्रीहि समासस्य उदाहरणमस्ति – [1]

अ) धर्मार्थौ ब) मीननयनम्

स) दशाननः द) पंचवटी

xiii) ''चतुर्युगम्'' इत्यत्र कः समासः ? [1]

अ) अव्ययीभावः ब) द्वन्द्वः

स) कर्मधारयः द) द्विगुः

xiv) ''आक्षिपन्ती'' इत्यत्र पदे कः उपसर्गः ? [1]

अ) आङ् ब) उद्

स) अव द) अप्

xv) ''निर्मलम्'' इत्यत्र उपसर्गं शब्दं च पृथक् कृत्वा लिखत । [1]

अ) निस् + मलम् ब) निर् + मलम्

स) निर्म + लम् द) नि + र्मलम्

**प्र.2)** निर्देशानुसारं रिक्तस्थानानि पूरयत ।

i) कृषिक्षेत्रे ............... चरति । (अज + टाप्) [1]

ii) ............ दुर्लभं लोके । (नर + त्व) [1]

iii) बुद्धिः ............ सदा । (बल + मतुप्) [1]

iv) गुरुः शिष्यं प्रश्नं ................. । (प्रच्छ–धातु – लृट्लकारः) [1]

v) ................ नमः । (पितृशब्दस्य चतुर्थी – एकवचनम्) [1]

vi) अहं गृहं .............. (गम्धातु – लोट् लकारः) [1]

vii) ............. देशः भारतम् । (अस्मद् – शब्दस्य षष्ठी – बहुवचनम्) [1]

**प्र.3)** अधोलिखितम् अपठितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

अ) भारतवर्षः अस्माकं देशः अस्ति । अयम् अस्माकं जन्मभूमिः अस्य भूमिः विविध – रत्नानां जननी अस्ति । अस्य प्राकृतिकी शोभा अनुपमा अस्ति । हिमालयः अस्य प्रहरी अस्ति । एषः उत्तरे मुकुटमणिः इव शोभते । सागरः अस्य चरणौ प्रक्षालयति । भारतवर्षः अखिलविश्वस्य गुरुरस्ति । अनेकाः पवित्रतमाः नद्यः अत्र वहन्ति । गङ्गा गोदावरी, सरस्वती, यमुना प्रभृतयः नद्यः अस्य शोभां वर्धयन्ति । अयं देशः सर्वासां विद्यानां केन्द्रम् अस्ति । अस्य संस्कृतिः धर्मपरम्परा च श्रेष्ठास्ति । वयं स्वदेशोपरि गर्वान्विता स्मः ।

अतिलघूत्तरात्मक प्रश्नाः –

क) एकपदेन उत्तरत । **[4 × ½ = 2]**

i) कः प्रहरी अस्ति ?

ii) कः चरणौ प्रक्षालयति ?

iii) अस्य भूमिः केषां जननी अस्ति ?

iv) हिमालय कुत्र मुकुटमणिः इव शोभते ?

ख) पूर्णवाक्येन उत्तरत ।

i) काः नद्यः शोभां वर्धयन्ति ? **[1]**

ii) अस्माकं देशः कोऽस्ति ? **[1]**

iii) अयं देशः कासां केन्द्रमस्ति ? **[1]**

ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **[1]**

घ) भाषिक कार्यम् – **[4 × ½ = 2]**

i) ''गर्वान्विताः स्मः'' इत्यत्र क्रियापदं लिखत ।

ii) ''शोभा अनुपमा अस्ति'' इत्यत्र विशेषणपदं किम् ?

iii) ''माता'' इत्यस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

iv) ''नद्यः अत्र वहन्ति'' इत्यत्र कर्तृपदं लिखत ।

ब) अधोलिखितौ संख्यावाचिशब्दौ संस्कृतेन लिखत । **[1 + 1 = 2]**

i) 125

ii) 328

## खण्ड – ब

प्र.4) हिमालयात् गङ्गा प्रभवति । रेखाकिंतपदे विभक्तिं तत्कारणं च लिखत । [2]

प्र.5) माता पुत्रं क्रुध्यति । वाक्यं संशोधयत । [2]

प्र.6) उद्याने पक्षिणां कलरवः चेतः प्रसादयति । रेखाकिंतपदे प्रश्न निर्माणं कुरुत । [2]

प्र.7) खगः एवं वनराजः भविष्यति । रेखाकिंत पदे प्रश्न निर्माणं कुरुत । [2]

प्र.8) अधोलिखितश्लोकस्य हिन्दी भाषायां सप्रसंगं भावार्थं लिखत । [2]

एक एवं खगो मानी वने वसति चातकः ।

पिपासितो वा म्रियते याचते वा पुरन्दरम् ।।

प्र.9) अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत । [2]

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।

न कुर्यादहितं कर्म स परेभ्यः कदापि च ।।

अन्वयः – य : (i) ................ श्रेयः (ii) .................. सुखानि च इच्छति, सः परेभ्यः अहितं (iii) ............ कदापि च न (iv).................. ।

| प्रभूतानि, कर्म, आत्मनः कुर्यात् |
|---|

प्र.10) स्वपाठ्य पुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्न पत्रे न स्यात् । [2]

प्र.11) ''शुचि पर्यावरणम्'' इति पाठसारं हिन्दी भाषायां लिखत । [2]

**प्र.12)** पर्यायपदं मेलयत । **[4 × ½ = 2]**

| | क | ख |
|---|---|---|
| i) | शीघ्रम् | मित्रम् |
| ii) | वयस्य | पुत्रः |
| iii) | सुतः | वासवः |
| iv) | इन्द्रः | अचिरम् |

**प्र.13)** मञ्जूषायाः प्रदत्तैः समुचितैः अव्ययपदैः वाक्यानि पूरयत । **[1+1+1=3]**

अधुना, सर्वत्र, श्वः, कुतः ।

i) ह्यः भवान् ........... भयात् पलायितः ?

ii) अहं विद्यालयं .............. गच्छामि ।

iii) ईश्वरः ............... अस्ति ।

## खण्ड – स

**प्र.14)** अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

''बहून्यपत्यानि मे सन्तीति सत्यम् । तथा प्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनु भवामि । यतो हि अयमन्येभ्यो दुर्बलः । सर्वेष्वपत्येषु जननी तुल्यवत्सला एव । तथापि दुबले सुते मातुः अभ्यधिका कृपा सहजैव'' इति । सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत् । स च तामेवमसान्त्वयत् – ''गच्छ वत्से ! सर्वं भद्रं जायेत ।''

क) एकपदेन उत्तरं लिखत । **[2 × ½ = 1]**

i) बहूनि कानि सन्ति ?

ii) सर्वेष्यपत्येषु जननी कीदृशी भवति ?

ख) पूर्णवाक्येन उत्तरं लिखत । **[2 × 1 = 2]**

i) दुर्बलेसुते मातुः कृपा कीदृशी भवति ?

ii) कस्य हृदयम् अद्रवत् ?

ग) यथानिर्देशम् उत्तरं लिखत । **[2 × ½ = 1]**

i) ''सर्वं भद्रं जायेत'' इत्यत्र क्रियापदं लिखत ।

ii) ''जननी तुल्यवत्सला'' इत्यत्र विशेषणपदं लिखत ।

अथवा

भूकम्पस्य केन्द्रभूतं भुजनगरं तु मृत्तिकाक्रीडनकमिव खण्डखण्डं जातम् । बहुभूमानि भवनानि क्षणेनैव धराशायीनि जातानि । उत्खाता विद्युद्दीपास्तम्भाः । विशीर्णाः गृहसोपानमार्गाः । फाल द्वये विभक्ता भूमिः । भूमिगर्भादुपरि निस्सन्तीभिः दुर्वार–जलधारामिः महाप्लावनदृश्यम् उपस्थितम् । सहस्रमिताः प्राणिनस्तु क्षणेनैव मृताः ।।

क) एकपदेन उत्तरत । **[2 × ½ = 1]**

i) के उत्खाताः?

ii) फालद्वये का विभक्ता?

ख) पूर्णवाक्येन उत्तरत । **[2 × 1 = 2]**

i) भुजनगरं कीदृशं जातम्?

ii) कियन्तः प्राणिनः मृताः?

ग) यथानिर्देशम् उत्तरं लिखत । **[2 × ½ = 1]**

i) ''बहुभूमानि भवनानि'' इत्यत्र विशेष्यपदं लिखत ।

ii) ''धराशायीनि जातानि'' इत्यत्र क्रियापदं लिखत ।

**प्र.15)** अधोलिखितं श्लोकं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः ।।

क) एकपदेन उत्तरत । **[2 × ½ = 1]**

i) कः गुणं वेत्ति?

ii) बली किं वेत्ति?

ख) पूर्णवाक्येन उत्तरत । **[1 + 1 = 2]**

i) पिकः कस्य गुणं वेत्ति?

ii) मूषकः कस्य बलं न वेत्ति?

ग) यथानिर्देशम् उत्तरं लिखत । **[2 × ½ = 1]**

i) ''निर्बलः न वेत्ति'' इत्यत्र कर्तृपदं लिखत ।

ii) ''निर्गुणः न वेत्ति'' इत्यत्र क्रियापदं लिखत ।

अथवा

क्रोधो हि शत्रुः प्रथमो नराणां,
देहस्थितो देहविनाशनाय ।
यथास्थितः काष्ठगतो हि वह्निः
स एव वह्निर्दहते शरीरम् ।।

क) एकपदेन उत्तरत । [2 × ½ = 1]

i) कः प्रथमः शत्रुः?

ii) केषां प्रथमः शत्रुः क्रोधः?

ख) पूर्णवाक्येन उत्तरत । [1 + 1 = 2]

i) क्रोधः कस्मै भवति?

ii) कीदृशः वह्निः दहते?

ग) यथानिर्देशम् उत्तरं लिखत । [2 × ½ = 1]

i) ''वह्निः शरीरं दहते'' इत्यत्र कर्तृपदं लिखत ।

ii) ''सः एव वह्निः दहते शरीरम्'' इत्यत्र सर्वनामस्थाने संज्ञापदं लिखत ।

प्र.16) अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

सिंह : – (क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?

एकः वानरः – यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः । राजा तु रक्षकः भवति परं भवान् तु भक्षकः । अपि च स्वरक्षायामपि समर्थः नासि, तर्हि कथमस्मान् रक्षिष्यसि?

काकः – वनराजः भवितुं तु अहमेव योग्यः ।

पिकः – कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का – का इति कर्कशध्वनिना वातावरणमाकुली करोषि ।

क) एकपदेन उत्तरत । [2 × ½ = 1]

i) राजा कीदृशः भवति?

ii) राजा कीदृशः न भवति?

ख) पूर्णवाक्येन उत्तरत । [1 + 1 = 2]

i) कः का–का इति कर्कशध्वनिं करोति?

ii) ''किं भयं न जायते?'' इति कः वदति?

ग) यथानिर्देशम् उत्तरं लिखत । [2 × ½ = 1]

i) ''अहं वनराजः अस्मि'' इत्यत्र कर्तृपदं लिखत ।

ii) ''सर्वे मिलित्वा मां तुदन्ति'' इत्यत्र क्रियापदं लिखत ।

अथवा

व्याघ्रः – गच्छ, गच्छ जम्बुक । त्वमपि कञ्चिद, गूढप्रदेशम् । यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तु मारब्धः परं गृहीतकर जीवितो नष्टः शीघ्रं तदग्रतः ।

शृगालः – व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः – प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा ।

क) एकपदेन उत्तरत । **[2 × ½ = 1]**

i) व्याघ्रमारीति कुत्र श्रूयते?

ii) ''गच्छ, गच्छ'' इति कः वदति?

ख) पूर्णवाक्येन उत्तरत । **[2 × 1 = 2]**

i) कस्मात् बिभेषि?

ii) कया प्रहरन्ती मया दृष्टा?

ग) यथानिर्देशम् उत्तरं लिखत । **[2 × ½ = 1]**

i) ''त्वमपि गच्छ'' इत्यत्र कर्तृपदं लिखत ।

ii) ''सात्मपुत्रौ कलहायमानौ'' इत्यत्र विशेषणपदं लिखत ।

**प्र.17)** अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजनं कृत्वा लिखत । **[3]**

i) घरे जलम् अल्पम् आसीत् ।

ii) तस्य मनसि एकः विचारः समागतः ।

iii) एकः पिपासितः काकः आसीत् ।

iv) सः पाषाणखण्डानि घरे अक्षिपत्, जलं च उपरि आगतम् ।

v) सः वने एकं घरम् अपश्यत् ।

vi) जलं पीत्वा काकः ततः अगच्छत् ।

अथवा

मंजूषायां प्रदत्तशब्दानां सहायतया ''वृक्षाः परोपकारकाः'' इति विषये षट् – संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत ।

| |
|---|
| फलानि, छायां, पथिकेभ्यः, वायुसंशोधकाः काष्ठम्, यच्छन्ति |

## खण्ड – द

प्र.18) भवान् दशम कक्षायाः रुद्राक्षः । भवतः विद्यालयस्य नाम राजकीय – उच्चमाध्यमिक विद्यालयः, आदर्श नगरम् अस्ति । अन्यस्मिन् विद्यालये विज्ञानमेलापकस्य आयोजनं भवति । भवान् तं द्रष्टुम् इच्छति । अतः तस्य कृते अनुमतिप्राप्त्यर्थं स्वप्रधानाचार्याय एकं प्रार्थनापत्रं लिखतु । [4]

अथवा

भवान् राकेशः अस्ति । वार्षिकी –परीक्षा – विषये स्वपितरं प्रति लिखिते अस्मिन् पत्रे मञ्जूषामाः उचितपदानि चित्वा रिक्तस्थानानि पूरयतु ।

(वार्षिकी, समीचीना, उत्तमान्, प्रणामाः स्नेहपूरितं, परीक्षायाम्, श्रेष्ठस्थानम्, प्रश्नपत्राणि)

पूज्यपितृचरणेषु,

सादरं (i) ................ ।

अत्रकुशलं तत्रास्तु । भवदीयं (ii) .................. पत्रं प्राप्तवान् । अधुना मम (iii) ................ परीक्षा प्रचलति । (iv) ................... इदानीं यावत् सर्वाणि (v) ................ सम्यक् अभवन् । शेष विषयाणां स्थितिः अपि (vi) ............. वर्तते । आशासे यत् परीक्षायाम् (vii) ................ अङ्कान प्राप्य कक्षायां (viii) ................ प्राप्स्यामि । सर्वेभ्यः नमोनमः ।

भवदीयः

पुत्रः

राकेशः

प्र.19) अधः प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्ट वाक्यानि लिखत । [8 × ½ = 4]

| धारयन्ति, बालाः, ते, बसयानम्, छत्रम्, चालकः, आरोहन्ति, वर्षायाम् |
|---|



अथवा

मञ्जूषातः उपयुक्तपदानि गृहीत्वा । जयपुरभ्रमणम् । इति विषये मित्रयोः परस्परं वार्तालापं पूरयतु ।

| |
|---|
| मेलिष्यावः, गमिष्यामः, मित्रैः, जयपुरम्, कार्यक्रमः, दर्शनीयम्, भ्रमणार्थम्, यात्रानुभवविषये । |

जयेश – अंकित! श्वः भवान् कुत्र गमिष्यति ?

अंकितः – अहं (i) ............... गमिष्यामि ।

जयेशः – तत्र किमपि कार्यं वर्तते ? अथवा (ii) ............. एव गच्छति

अंकितः – कार्यं नास्ति, अहं तु (iii).............सह भ्रमणार्थं गच्छामि ।

जयेशः – जयपुरे कुत्र–कुत्र भुमणस्य (iv)............. अस्ति ?

अंकितः – वयं तत्र आमेर – दुर्गं, गोविन्ददेवमन्दिरं जल भवनं च (v) ............... ।

जयेशः – नाहरगढदुर्गमपि पश्यतु । तदपि (vi)............. अस्ति ।

अंकितः – निश्चयेन तत्र गमिष्यामः ।

जयेशः – अस्तु । अधुना अहं गच्छामि । सोमवासरे आवां (vii) ............. । तदा (viii).................. वार्तालापं करिष्स्यावः ।

प्र.**20)** अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं कुरुत । **[4]**

i) वह मन्दिर की ओर जाता है ।

ii) सडक के दोनों ओर वन है ।

iii) वह कलम से पत्र लिखेगी ।

iv) सीता राम के साथ वन गई ।

v) गाँव के बाहर सरोवर है ।

vi) भारत पुनः विश्वगुरु बनेगा ।

DO NOT WRITE ANYTHING HERE